नेतरस्य प्रतिग्रहीतुरित्यर्थः । नन्वेवं कन्यावदुभयत्रापि सापिण्ड्यमास्तां प्रतिग्रहेण गोत्रवत् सापिण्ड्यस्याप्युत्पत्तेरिति चेन्नैवम् "सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः । विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते" इति वृद्धगौतमस्मरणविरोधात् । ये दत्तादयः सुताः सगोत्रेषु सगोत्रमध्ये कृतास्ते विधिना गोत्रतां सन्ततित्वं यान्ति परन्तु तैः सह विधिना सापिण्ड्यं न विधीयते नोत्पद्यत इत्यर्थः। सगोत्रेऽपि सापिण्ड्यानुत्पत्तौ परगोत्रे सुतरां सापिण्ड्यानुत्पत्तिरुक्ता । युक्तञ्चैतत् पित्रारब्धत्वेन भर्त्रा सहैकशरीरारब्धत्वेन च यथा उभयत्रापि सापिण्ड्यं सिद्ध्यति न तथा दत्तके पित्रारब्धत्वेऽपि प्रतिग्रहीत्रा सहैकशरीरारब्धत्वाभावात्" । तत्र चायमर्थः धर्मार्थं स्वस्यालोकतापरिहारकधर्मसम्पत्त्यर्थं तत्तद्गोत्रेण जनकापेक्षया भिन्नगोत्रेणापि परिग्रहीता पुत्रवत् पुत्रप्रतिनिधितया परिवृह्य ये पुत्रा वर्द्धिताः तेषु केवलं परिग्रहीतृसपिण्डविभागित्वमेव न सापिण्ड्यमिति तस्मात् अत्र दत्तके न परिग्रहीतृसापिण्ड्यं किन्तु जनककुल एव साप्तपौरुषिकं सापिण्ड्यमिति सिद्धम्" ।

"नन्वेवं दत्तकस्य प्रतिग्रहीतृकुले सापिण्ड्याभावे कथं विवाहो न स्यादिति चेत् सत्यम् । सगोत्रत्वादिति ब्रूमः । तर्हि तद्भगिन्यादिसन्ततौ विवाहोऽस्तु सगोत्रत्वसपिण्डत्वयोरभावात् न चात्र निषेधकं वचनमुपलभामहे प्रत्युत "सावित्रीं यस्य यो दद्यात् तत्कन्यां न विवाहयेत् । तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत्" इत्याद्यनुकूलमेव वचनमस्ति । न चेष्टापत्तिः अविच्छिन्नाविगीतसकलदेशीयशिष्टाचारविरोधात् तस्मात् किं तत्राविवाहनिमित्तमिति । अत्र कैश्चिदुच्यते "असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" इति मनुवाक्ये स्वस्यासपिण्डेति वक्तव्ये यत् पितुरसपिण्डावचनं तद्दत्तकस्य प्रतिग्रहीतृसपिण्डाया विवाहो मा प्रसाङ्क्षीदित्येवमर्थम् अन्यथा पितृद्वारके सापिण्ड्ये मूलपुरुषादष्टमस्य वरस्य, मातृद्वारके सापिण्ड्ये मूलपुरुषात् षष्ठ्याः कन्याया विवाहो न स्यात् पितुः सपिण्डत्वेन असपिण्डताऽभावात् न चेष्टापत्तिः "पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा" इत्यादिसकलस्मृतिनिबन्धशिष्टाचारविरोधात् । न चेदं दूषणं दत्तकेऽपि समानम् अष्टमस्य तस्य षष्ठ्याः कन्यायाः पितुः सपिण्डत्वेन अविवाह्यत्वप्रसङ्गादिति वाच्यम् "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते" इति मत्स्यभाष्यवाक्येन सप्तमस्य दत्तकपितुर्मूलपुरुषासपिण्डत्वेन षष्ठ्याः कन्यायास्तदसापिण्ड्येन षष्ठ्याः सप्तमस्य च पितुः सपिण्डत्वाभावादित्युक्तमेव । तस्मात् दत्तकसापिण्ड्यनिर्णायकमिदमेव वचनमिति कानुपपत्तिः ? । तदतिभ्रान्तप्रलपितं विकल्पासहत्वात् तथा हि किमिदं दत्तकस्यैव सापिण्ड्यनिर्णायकम् उत दत्तकौरसयोरुभयोरिति । नाद्यः द्वेधा हि अस्य वचनस्य दत्तकविषयता सम्भवेत् दत्तकप्रक्रमाद्वा दत्तकसापिण्ड्यनिर्णायकविशेषवचनैकवाक्यत्वाद्वा न चेहोभयमप्यस्ति अनुपलम्भात् । किञ्चास्य दत्तकपरत्वे अत्रत्यं पितृपदं गौण्या प्रतिग्रहीतृपितृपरं स्यात् तच्च अनिष्टम् "न विधौ परः शब्दार्थ" इति न्यायविरोधात् । नाप्यन्त्यः पितृपदे युगपद्वृत्तिद्वयविरोधात् । न च गङ्गायां मीनघोषावित्यत्रेव वृत्त्यन्तरतात्पर्य्यग्राहकं प्रमाणमस्ति । तस्मात् औरसविषयमेवेदं वचनं गर्भाधानादिप्रक्रमात् "पञ्चमात् सप्तमादूर्द्ध्वमिति" वचनान्तरैकवाक्यत्वाच्च । न चास्यौरसपरत्वे कूटस्थात्" अष्टमस्य वरस्य षष्ठीकन्यायाश्च अनुद्वाह्यत्वप्रसङ्गः पितुरसपिण्डत्वाभावादित्युक्तमेव दूषणमिति वाच्यम् तस्य पितुरिति पञ्चम्यां षष्ठीभ्रमनिबन्धनत्वेन अदूषणत्वात् । अतएव योगीश्वरेण "मातृतः पितृतस्तथा" इत्यत्र पञ्चमीत्वनिर्णायकस्तसिल्प्रयोग आदृतः। तस्यापि सार्वविभक्तिकत्वशङ्कायाम् "ऊर्द्ध्वं सप्तमात् पितृबन्धुभ्यो वीजिनश्च मातृबन्धुभ्यः पञ्चमादिति" गौतमवाक्ये पञ्चम्या निर्णय इति न किञ्चित् समाधानमिति समाधानान्तरं वक्तव्यम् । तत्रापरे आहुः "क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्त्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः" इत्यत्र वाक्ये क्षेत्रजादीनां पुत्रप्रतिनिधित्वाभिधानात् "प्रतिनिधिस्तद्धर्मा स्यादिति" न्यायेन सकलौरसधर्म्मप्राप्त्या प्रतिग्रहीत्रादिपितृसपिण्डावर्ज्जनं सेत्स्यतीति । तन्न "न सापिण्ड्यं विधीयते" इत्यनेन निषिद्धस्य सापिण्ड्यस्य अतिदेशासम्भवेनाप्राप्त्या तद्वर्ज्जनासम्भवात् । एतेन पुत्रनाम्ना औरसधर्म्मातिदेशात् प्रतिग्रहीत्रादिपितृसपिण्डावर्ज्जनसिद्धिरित्यपास्तम् "न तौ पशौ करोतीति" वत् निषिद्धस्य सापिण्ड्यस्य अतिदेशासम्भवेन वर्ज्जनासम्भवात् तस्मात् अनन्यगत्या वाचनिकमेव प्रतिग्रहीतृकुले सापिण्ड्यम् अभ्युपगन्त-